International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 328-331
© 2026 IJMH
www.themultijournal.com
Received: 26-03-2026
Accepted: 22-04-2026
Publish : 24-04-2026

**प्रो. के. अनन्तः**
आचार्यो विभागाध्यक्षश्च,
विशिष्टाद्वैत-वेदान्तविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नई दिल्ली

**Correspondence:**
**प्रो. के. अनन्तः**
आचार्यो विभागाध्यक्षश्च,
विशिष्टाद्वैत-वेदान्तविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नई दिल्ली

# आत्मज्ञातृत्वविमर्शः

**प्रो. के. अनन्तः**

**पत्रसारः –**

भारतीयदर्शनपरम्परायां आत्मतत्त्वस्य स्वरूपनिरूपणं प्रधानविषयत्वेन परिगण्यते। तत्र आत्मनः ज्ञातृत्वं, कर्तृत्वं, भोक्तृत्वं च प्रमुखधर्मत्वेन विविधैर्दर्शनाचार्यैर्विचारितम्। विशिष्टाद्वैतवेदान्तस्य प्रवर्तकेण भगवान् श्रीरामानुजाचार्येण आत्मा स्वभावतः ज्ञानाश्रयः, ज्ञाता, कर्ता, भोक्ता च इति सिद्धान्तः प्रतिपादितः। आत्मा न केवलं ज्ञानमात्रस्वरूपः, अपितु धर्मभूतज्ञानविशिष्टः स्वतन्त्रपरमात्माधीनः चेतनद्रव्यविशेषः इति तस्य मतम्।

श्रीभाष्ये, वेदार्थसंग्रहे, गद्यत्रये तथा गीताभाष्ये च श्रीरामानुजाचार्यः आत्मनः ज्ञातृत्वं प्रमाणैः, युक्तिभिः, श्रुतिस्मृतिपुराणप्रमाणैश्च सुस्पष्टं निरूपयति। आत्मा ज्ञानस्य आश्रयभूतः सन् ज्ञानेन विषयानवगच्छति, न तु ज्ञानमेव भवति। धर्मभूतज्ञानस्य सङ्कोचविकासरूपपरिणामेन जीवस्य संसारदशा तथा मोक्षदशा च व्याख्यायते। मोक्षावस्थायां धर्मभूतज्ञानस्य अनन्तविकासः सम्पद्यते, तदा जीवः परमात्मानं साक्षादनुभवति।

अतः विशिष्टाद्वैतदर्शने आत्मज्ञातृत्वविमर्शः केवलं दार्शनिकविषयः न, किन्तु जीवस्वरूप, बन्ध, मोक्ष तथा भगवदनुभवस्य मूलाधारभूतः सिद्धान्तः। अस्मिन् विमर्शे श्रीरामानुजदर्शनानुसारम् आत्मनः ज्ञातृत्वस्वरूपं श्रुतियुक्त्यनुभवप्रमाणाधारितया समीक्ष्यते।

**आत्मज्ञातृत्वम् -**

अद्वैतमते ज्ञानं नित्यम्। न तु क्षणिकम्। तथा ज्ञानं स्वयं प्रकाशकञ्च। स्वयं प्रकाशत्वहेतुभूतधर्मवत्तयाऽनुभूतिर्नाम ज्ञानं नित्यं प्रागभावाद्यभावात्। ज्ञानस्य स्वयं प्रकाशकत्वेन नित्यत्वादज्ञानस्यास्तित्वदशायां तत्प्रागभावमवगन्तुं नैव शक्यते। एकस्मिन् काले ज्ञानतत्प्रागभावयोर्विरोधात्। असति ज्ञाने तत्प्रागभावमपि नावगन्तुं शक्यते। अत अनुभूतिस्सती न स्वप्रागभावमवगमयति। एवं ज्ञानमन्योन्यगोचरत्वेनान्यतोऽपि ज्ञानस्य प्रागभावमवगन्तुं नैव शक्यते।

यदि ज्ञानस्य प्रागभावं साधयितुमिच्छति चेत्, तदा इयमनुभूतिरिति विषयीकृत्य साधयेत्। परन्तु अनुभूतेर्नित्यत्वेन इयमिति विषयीकारानर्हत्वेन ज्ञानस्य प्रागभाव अन्यतो नावगम्यते। ज्ञानस्य नित्यत्वेन प्रतीयोगिस्वरूपज्ञानाभावाच्च। तस्मादनुभूतिर्नित्या प्रागभावाद्यभावात्।

एवमनुभूतेः प्रागभावस्य दुर्ग्रहत्वात्तस्य उत्पत्तिरपि वक्तुं नैव शक्यते। प्रागभावस्याभावरूपतया तत्प्रतिबद्धाश्चन्येऽपि भावविकारा न सन्त्येव। अतः ज्ञानस्य निर्विकारत्वमेव।

किञ्चानुत्पन्ना इयमनुभूतिर्नानात्वं न सहते। यतो हि नानात्वव्यापिका या उत्पत्तिस्तद्विरुद्धभूता या अनुत्पत्तिः तस्यास्सत्त्वात्। अत अनुत्पन्नस्य नानात्वाभावादजडस्य नित्यस्य ज्ञानस्य सजातीयभेदोऽपि नास्ति। तस्माद् ब्रह्मणः विजातीयभेदः सजातीयभेदश्च नास्त्येव।

एवं ज्ञाने निखिलभेदस्याभावात् स्वरूपातिरिक्ततया ज्ञाता न कश्चिदस्ति। अत्रायं पुरुषः स्वयं ज्योतिर्भवतीति[1] श्रुतिवचनेनात्मनः स्वयं प्रकाशकत्वं नित्यत्वञ्च बोध्यते। तादृशस्वयं प्रकाशकत्वं नित्यत्वञ्च ज्ञानेऽस्तीति ज्ञानमेव आत्मा। यदि-अहं जानामीति लौकिकव्यवहारेण ज्ञानातिरिक्ततया ज्ञातृता प्रतीयते। तथैव ज्ञानरूपे आत्मनि अहमिति व्यवहारेणापि ज्ञातृताप्रतीयत एवेति चेत् -

सा प्रतीतिभ्रान्तिसिद्धैव। यथा लोके शुक्तिशकलं दृष्ट्वा रजतभ्रान्तिं प्राप्नोति। तद्वदेव ज्ञातृत्वभ्रान्तिः। अपि च लोकव्यवहारेण ज्ञातृत्वे प्रतीयमानेऽपि तत्र ज्ञानांशस्यैव पारमार्थ्यं कर्त्रंशस्य तु अपारमार्थ्यमेव। अतो मनुष्योऽहमित्यन्तर्बहिर्भूतमनुष्यत्वादि विशिष्टपिण्डात्माभिमानवज्ज्ञातृत्वमप्यध्यस्तम्। किञ्च ज्ञातृत्वं हि ज्ञानक्रियाकर्तृत्वम्। तच्च कर्तृत्वं विकारशालिनः। अहं शब्दास्पदस्य चान्तःकरणग्रन्थेरेव। तस्माज्ज्ञानक्रियाकर्तृत्वं नाम ज्ञातृत्वमविक्रिये साक्षिणि चिन्मात्रात्मनि नैव सम्भवति।

एवं निर्विकारस्य ज्ञानस्याभिव्यञ्जको जडोप्यहङ्कारः स्वाश्रयतया तमभिव्यनक्ति। आत्मस्थतयाऽभिव्यङ्ग्याभिव्यञ्जनमभिव्यञ्जकानां स्वभावः। तस्मादहङ्कार अभिव्यञ्जक एव। अत एव तस्य स्वाश्रयतयाऽभिव्यञ्जकत्वम्। आत्मस्थतयाऽभिव्यञ्जनं न दर्पणत्व-प्रयुक्तं नापि प्रतिविम्बत्वप्रयुक्तम्। किन्तु अभिव्यञ्ग्यकत्वमात्र प्रयुक्तम्। यथा-दर्पणजलखण्डादिर्हि मुखचन्द्रबिम्बगोत्वादिक-मात्मस्थतयाऽभिव्यनक्ति। एवं संविदः व्यङ्तृव्यञ्जकभावकृतो जानाम्यहमिति ज्ञातृत्वाभास इति। यथा -दर्पणजलखण्डादिर्हि मुखचन्द्रबिम्बगोत्वादिकमात्मस्थतयाऽभिव्यनक्ति। तद्वदेवाभिव्यञ्जकः जडभूतः अहङ्कारग्रन्थिरपि स्वप्रकाशज्ञाने आत्मस्थतयाऽभिव्यनक्ति। तेनाहं जानामीति भ्रमः जायते। अत अहं जानामीति ज्ञाता अयमहमर्थः चिन्मात्रात्मनो न तु पारमार्थिको धर्मः। अत एव अयमहमर्थः गाढसुषुप्तौ मोक्षदशायां वा नानुवर्तते। पामराणां स्थूलोऽहं कृशोऽहमित्यादि वाक्यैः परमार्थे अनात्मनि देहे स्थूलत्वादि धर्मा आत्मन एवेति भावना जायते। तत्र यथा -

अनात्मनि देहे आत्मभावना यथा मिथ्या तथैवाहं जानामीति व्यवहारे ज्ञातृत्वमपि मिथ्यैव। तथाहमर्थस्य प्रतिभास्यमानत्वात् स्वाभाविकं ज्ञानरूपमात्मैव तद्दशायां प्रतिभाति। नाहं खल्वयमेवं सम्प्रत्यात्मानं जानाति अयमहमस्मीति स्वापविषयां श्रुतिमनुसृत्य, तथैव-अहङ्कारं, बलं, दर्पं, कामं, कोधं, परिग्रहं, विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पत इत्यादि वचनैः ज्ञातृत्वं न पारमार्थिको धर्मः। अत एव 'अहङ्कार विमूढात्मा कर्ताहमिति मन्यत' इति तस्य भ्रान्तिसिद्धमेव। अत एव सुप्तोत्थितः कदाचित् ममेदमिति न ज्ञातवानिति परामर्शस्सङ्गच्छते।

तस्मात् परमार्थतो निरस्तसमस्तभेदविकल्प निर्विशेषचिन्मात्रैकस्य कूटस्य नित्यसंविदेव भ्रान्त्या ज्ञातृज्ञेयरूप विविध विचित्रभेदा निवर्तन्ते। इत्येवं सङ्ग्रहेण निर्गुणाद्वैतब्रह्मवादिनामाशयः। अयमत्र औपनिषदः विशिष्टाद्वैतसिद्धान्तः।

अनुभूतिः परमार्थतो निर्विषया निराश्रया च सती अहं जानामीत्यादौ भ्रान्त्या ज्ञातृत्वमवभासत इत्यादिकं यदुक्तं तत्सर्वमयुक्तमेव। तथा हि-

स्थूलोऽहं कृशोऽहमित्यादौ देहात्माभिमानिन ज्ञानानात्मनि देहे आत्मेति भावना जायते। स एव च मम ज्ञानमित्येवं भावयति। निर्विकारेऽऽत्मनि ज्ञातृत्वं मिथ्येतिवत् मम ज्ञानमिति वाग्व्यवहारे भासमानस्य ज्ञानस्यापि मिथ्यात्वापत्तिः। किञ्चाहं जानामीति देहात्माभिमानिनः व्यवहारात् यथा ज्ञातृत्वं मिथ्येति मते आत्मस्थतयाऽनुभूतेरपि नाम ज्ञानस्यापि मिथ्यात्वापत्तिः ज्ञानातिरिक्तानां सर्वेषां मिथ्येति ज्ञानस्य मिथ्यात्वं नोक्तमिति चेत्-यथा ज्ञानस्याबाधितत्त्वेन न मिथ्यात्वं ज्ञातृत्वस्यापि न मिथ्यात्वम्। सकलेतरोपमर्दि तत्त्वज्ञानाबाधितत्वं ज्ञानविषये ज्ञातृविषये च सममेव खलु।

किञ्च विक्रियस्याऽत्मनो ज्ञानक्रियाकर्तृत्वरूपज्ञातृत्वं न सम्भवति। अतो ज्ञातृत्वं विक्रियात्मकं जडं विकारास्पदाव्यक्तपरिणामाहङ्कार-ग्रन्थिस्थत्वेन ज्ञातृत्वं नात्मनः किन्तु अन्तःकरणरूपस्याहङ्कारस्य धर्म इति यदुक्तं तदपि अयुक्तमेव। यतो हि ज्ञातृत्वं नान्तःकरणधर्मः। अहङ्कारग्रन्थिस्थमन्तःकरणं देहादिवदेचेतनमेव।

प्रकृतिपरिणामरूपञ्च। दृश्यञ्च । देहेन्द्रियादीनां दृश्यत्वं प्रसिद्धमेव। अतः ज्ञातृत्वं नान्तःकरणधर्मः। किन्तु चेतनगतासाधारणधर्मः। अहं प्रत्ययगोचरत्वं कर्तुत्वं यदि चात्मनोऽभ्युपगम्यमाने देहस्येवानात्म-त्वपराक्त्व जडत्वादिप्रसङ्गो इत्युच्यते तदप्ययुक्तम्। यतो हि देहस्येवाचेतनत्वप्रकृति-परिणामत्वदृश्यत्व पराक्त्व परार्थत्वादि-योगादन्तःकरणरूपाहङ्कारस्य ज्ञातृत्वस्य चेतनासाधारणस्वभा-वाच्च। तस्मादन्तःकरणमव्यक्त-जडप्रकृति-जन्य-द्रव्यत्वेन आत्मनः भिन्नत्वेन न ज्ञातृत्वं जडात्मकस्याहङ्कारस्य धर्मः। किन्तु आत्मधर्मः। एवमन्तःकरणमपि घटादिवद्देहादिवच्च चित्पदार्थतया देहस्य यथा ज्ञातृत्वं नास्ति तद्वदेवान्तःकरणस्यापि ज्ञातृत्वं प्रामाणिकः अन्येऽपि श्रीभाष्ये भगवद्रामानुजैः निरूपितम्।

यदि बाधिताबाधित भेदरहिततयाऽहं प्रत्ययगोचरत्वमेवानात्मत्व-मित्युच्यते चेत् तर्हि रजतप्रत्ययगोचरत्वमात्रेण शक्तौ रजतज्ञानस्य यथा मिथ्यात्वं तथा वास्तव रजतस्यापि मिथ्यात्वापत्तिः। तस्याप्यहं प्रत्ययगोचरत्वात्।

अपि च ज्ञातृत्वं न विक्रियात्मकं नापि क्रियात्मकं वा किन्तु ज्ञानात्मकगुणस्याश्रयभूतमेव। ज्ञानं नाम गुणः, गुणी तु आत्मा। आत्मा तु नित्यः तत्सम्बन्धित्वेन ज्ञानस्य नित्यत्वम्।

आत्मनः नित्यत्वमेवेति भगवता व्यासेन "नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः"[2] उक्तमेव। तथा हि आत्मनः निरवयवत्वेन सर्वगतत्वेन च तस्योत्पत्तिः निरूपयितुमशक्या। तथैवाकाशस्यापि निरवयवत्वेन सर्वगतत्वेन तस्याप्युत्पत्तिर्नास्ति। अत एव छान्दोग्ये सृष्टिप्रकरणे-"तदैक्षत बहुस्यां प्रजायेयेति"[3] बहुभवनसङ्कल्पपूर्वकतया परब्रह्म नारायणः चराचरात्मकमिदं जगत् ससर्जेति प्रतिपादितम्। तत्राकाशसृष्टिः न पठिता। तेनाकाश-उत्पत्तिरहितत्वेन तस्य नित्यमित्यवगम्यते। परन्तु "तस्माद्वा एतस्मादात्मन आकाशस्सम्भूत" इति तैत्तिरीयश्रुत्या "एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च खं वायु ज्योतिराप" इति श्रुत्या चाकाशस्योत्पत्तिरवगम्यते। इत्येतादृश शङ्कानिवृत्तये ब्रह्मसूत्रकारेण भगवता बादरायणेनैवं समाधान-

मुक्तम्-"न वियदश्रुतेः"[4] इति। अश्रुतेः आकास्योत्पत्तिः श्रुत्याऽनुक्त-त्वात्, वियद्- आकाशः न-नोत्पन्नः इति सूत्रार्थः। एवमाकाशस्यो-त्पत्तिर्नास्तीत्युक्त्वापि पुनरेवं शङ्का उद्भविता सा च "अस्ति तु"[5] इति आकाशस्योत्पत्तिरस्तीत्येव। अतीन्द्रियविषयगोचराण्येव (बाधकान्येव) श्रुतिवाक्यानि। तस्मादाकाशस्सम्भूत इत्यादि तैत्तिरीयश्रुत्योत्पत्तिरस्तीत्यवगम्यते। छान्दोग्ये - "ऐतदात्म्यमिदं सर्व"मित्यादि तदुत्तरवाक्येन सर्वस्य ब्रह्मात्मकत्वात् पृथिव्यादिवत् आकाशोऽपि परब्रह्मण उत्पन्न इति स्पष्टमवगम्यते।

किञ्च श्रुतिरपि 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः पृथिवी विश्वधारिणी'[6] (मु - 2-1-3) इति श्रुत्या च आकाशस्य पृथिव्यादीनां महदादीनामिवोत्पत्तिरुक्ता। एवं रीत्याऽकाशादिवज्जीवोऽपि ब्रह्मण एव जायते। अत एव 'कस्मिन्नु भगवो विज्ञाते इदं सर्वं विदितं भवती'ति बृहदारण्यकश्श्रुत्युक्तरीत्या च एकविज्ञानेन सर्वविज्ञानोपपत्तिः। 'सदेव सोम्येदमग्र आसीदेकमेवा-द्वितीयमि'ति छान्दोग्यश्रुत्या च प्राक् सृष्टेरेकत्वावधारणा।

किञ्च वियदादेरिव जीवस्याप्युत्पत्तिरस्तीति "यतः प्रसूता जगतः प्रसूतिः तोयेन जीवान व्यससर्ज भुम्यां"[7], एवं "प्रजापतिः प्रजा असृजत"[8], "सन्मूला सोम्येमा सर्वा प्रजा सदायतना सत्प्रतिष्ठा"[9] "यतो वा इमानि भूतानि जायन्त"[10] इत्यादिभिः स्पष्टीकृतैव। एवं सचेतनस्य जगत उत्पत्तिवचनाज्जीवस्याप्युत्पपत्तिः प्रतीयते इत्येवं शङ्कायां-

जीवस्य तु उत्पत्तिर्नास्ति इति भगवता सूत्रकारेण "नात्माऽश्रुतेर्नित्य-त्वाच्च ताभ्यः"[11] 2-3-18 सिद्धान्तितम्। अश्रुतेः सुष्टिबोधकश्श्रुति-वचनेषु जीवोत्पत्तेरनुक्तत्वात्, ताभ्यः श्रुतिवचनेभ्यः नित्यत्वाच्च आत्मा नित्य इति स्पष्टीकृतत्वाच्च जीवस्योत्पत्तिर्नास्तीत्यवगम्यते। "न जायते म्रियते वा विपश्चित"[12] "ज्ञाज्ञी द्वावजा-वीशनीशौ"[13] इत्यादिभिः जीवस्योत्पत्तिप्रतिषेधो हि श्रूयते। अत्र विपश्चित् शब्दस्य जीव इत्यर्थः। विविधं पश्यन्ती चित् यस्य तत् स विपश्चित्। भिन्नभिन्नविषयकज्ञानाश्रयत्वेन च जीवस्य ज्ञातृत्वमस्तीत्यवगम्यते। न जायते न म्रियते इत्युक्तत्वेन जीवस्य जननं मरणं च नास्तीति जीवस्योत्पत्तिर्निषिद्धा। अस्य जीवस्य नित्यत्वञ्च "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां विदधाति कामान्"[14], "अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे"[15] इत्यादिभिः बोध्यते। तत्र न हन्यते हन्यमाने शरीरे इत्यनेन देहस्यैवोत्पत्ति विनाशौ नात्मन इति स्पष्टमवगम्यते। उत्पत्तिर्नाम देहान्तरस्वीकारः। मरणं नाम देहपरित्यागः। न तादृश उत्पत्तिविनाशौ जीवस्य नास्तीति श्रुतितात्पर्यम्। अजः उत्पत्तिरहितः जीवः, स च नित्यः त्रैकालिक-सत्तावान् पुराणसनातनश्रुत्येवं श्रुत्यैवोक्तम्।

सिद्धान्तभूते जीवस्यानुत्पत्तिपक्षे एकविज्ञानेन सर्वविज्ञानमिति प्रतिज्ञायाः भङ्गो नास्ति। यतो हि-एकेन मृत्पिण्डज्ञानेन सर्वस्य मृण्मयस्य घटादिकस्य ज्ञानं जायते। एकेन सुवर्णखण्डेन सर्वं स्वर्णमयं कङ्कणादिकस्य ज्ञानं जायते। एतेन यदुपादानकारणभूतं तेन ज्ञानेन तत्परिणामभूतानां ज्ञानं जायत एव। तथैव सूक्ष्मचिदचिद्विशिष्टं कारणभूतं यद् ब्रह्म तस्य ज्ञानेन तत् कार्यभूतस्य नाम स्थूलचिदचिद्विशिष्टब्रह्मणः ज्ञानं जायते। एकविज्ञानेन सर्वविज्ञानं नाम कारणब्रह्मज्ञानेन तत्परिणामभूतस्य कार्यब्रह्मणः जगतः ज्ञानं जायत इत्येकविज्ञानेनेति नियमः उपपद्यत एव। बहुस्यां प्रजायेयेति बहुभवनसङ्कल्पमनुसृत्य कारणब्रह्मणः कार्यब्रह्मात्मकतया परिणामः। अतः वियदादेरचेतनस्य यादृशऽन्यथाभावो न तादृशो जीवस्य। ज्ञानसङ्कोचविकासलक्षणो जीवस्यान्यथाभावः। वियदादेस्तु स्वरूपान्यथाभावलक्षणः। सेयं स्वरूपान्यथाभाव-लक्षणोत्पत्तिः जीवे प्रतिषिध्यते। तस्मात् बहुविधश्रुतिवचनान्यनुसृत्य नात्माश्रुतेरिति ब्रह्मसूत्राकाराणां वचनं चानुसृत्य आत्मनः नित्यत्वमेवेति स्पष्टमवगम्यते ।

अत एव आत्मनः ज्ञातृत्वमपि अस्त्येवेति ब्रह्मसूत्रकारैरेव "ज्ञोऽत एव"[16] इत्युक्तम्। ज्ञ एव ज्ञातृत्व वादेवादमात्मा न ज्ञानमात्रम्। नापि जडस्वरूपः। अत एव श्रुत्युक्तत्वादेवेति तात्पर्यम्। सूत्रे एवकारः उभयत्र अन्वेति। ज्ञ एव, अत एवेति। एकत्रावधारणार्थकः। अन्यत्र हेत्वर्थकः। श्रुतयस्तावत् न जायते म्रियते इत्यादयः। ताः श्रुतयः अतश्शब्देन परामृश्यन्ते। एवं छान्दोग्ये प्रजापतिवाक्ये मुक्तामुक्तात्मकस्वरूपकथने यत्र एतदाकां मनुविषण्णं चक्षुः। स चाक्षुषः पुरुषः। दर्शनाय चक्षुः। अयथो वेदे दं जिघ्राणीति स आत्मा[17] इत्यादिना चक्षुरुपकरणमुद्दिय पुरुषशब्देनात्मत्वं विधायते। चक्षुस्तु तद्दर्शनाय करणमात्रम्। एवं गन्धग्रहणे करणं प्राणम्। ज्ञाता तु आत्मैव। एवं चक्षुरादीनां रूपादीनामात्मनश्च करणत्वज्ञेयत्वज्ञातृत्व-प्रदर्शनमुखेन शरीरेन्द्रियेभ्यो व्यतिरिक्त इत्युपपादितः। उक्तो यामुनाचार्यैः।

देहेन्द्रिय मनः प्राण धीभ्यऽन्योऽनन्यसाधनः इति । एवं-"मनसा एतान् कामान् पश्यन् रमते। य एते ब्रह्मलोके। य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोन्वष्टव्यः स विजिज्ञासितव्यः"[18] "नोपजनं स्मरन्निदं शरीरम्"[19]

**न पश्यो मृत्युं पश्यति न रोगं नोतदुःखताम्।**
**सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः॥**

अत्र पश्य इति दर्शनक्रियाश्रयः ब्रह्मदर्शीत्यर्थः। एवं बृहदारण्यके-कतम आत्मा इति पृष्ट्वा योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः[20] इत्यादिना याज्ञवल्क्यमहर्षिः राजर्षि जनकं प्रति प्रत्युवाच। अनेन हृत्कमलमध्यगतः प्राणाशब्दितेन्द्रिय मुख्यप्राणमध्यगतः विज्ञानधर्मको ज्योतिश्शब्दित प्रकाशस्वरूपः पुरुषो जीव इति स्पष्टमुक्तम्।

एवमेव-"विज्ञातारमरे केन विजानीयात्"[21] योऽयं विज्ञाता जीवः तत्स्वरूपं कथं ज्ञातुं शक्यते जानात्येवायं पुरुषः। जीवस्वरूपं ज्ञातुं शक्यत एवेति। "एष हि द्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः"[22] इति श्रुतिवाक्ये नैकसंख्यानां कर्त्रर्थकर्तृच-प्रत्ययान्तानां निर्देशात् आत्मनः ज्ञातृत्वमस्त्येवेति सुस्पष्टम्।

एवमेवास्य परिष्टरिमा षोडाकला[23] इति वाक्येन जीवः षोडशकलात्मक इति स्पष्टम्। तस्मात् जीवः न केवलं ज्ञानमात्रं अपि तु ज्ञाता च ।

**पाद टिप्पणी**

[1]बृ. 6-3-9
[2]ब्र.सु - 2-3-18
[3]छान्दोग्ये - 6-2-3
[4]ब्र.सु - 2-3-1
[5]ब्र.सु - 2-2-2
[6]मु – 2-1-3
[7]तै.चा.आ. 1-0-1-1
[8]ते.बा.आ. 2-2-0-1
[9]तै - 6-8-4
[10] तै - 3-3-1
[11] ब्र.सु - 2-3-18
[12] कठ-2-18
[13] श्वे - 1-8
[14] छान्दोग्या – 6.3
[15] क-2-18
[16] ब्र.सु - 2-3-19
[17] छान्दोग्या – 8.12.4
[18] छान्दोग्या – 8.7
[19] छान्दोग्या – 8.12.3
[20] बृ – 6.3.7
[21] बृ-6-8-18
[22] प्रश्न - 4-9
[23] प्रश्न-6-5